# संस्कृत-वार्ता:

दिनाङ्क :.10.01.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातम् उपेत्य सोमनाथ-स्वाभिमान-पर्व समेत्य प्रमुखाध्यात्मिक- कार्यक्रमेषु सहभागं करिष्यति।
- विकसितभारत-युवनेतृ-संवाद-कार्यक्रमः अद्य नव-दिल्ल्याम् आरब्धः। युव-कार्य-क्रीडामन्त्री मनसुख-मांडविया अवोचत् यत् अयं कार्यक्रमः युवानः राष्ट्रनिर्माणे सम्मेलयितुं प्रशासनस्य प्रतिबद्धतां प्रकटयति।
- त्रिपञ्चाशत-तमं विश्व-पुस्तक-मेलापकम् अद्य राष्ट्रिय-राजधान्यां नवदिल्ल्याम् आरब्धम्। अस्मिन् नव-दिवसीये आयोजने पञ्चत्रिंशदधिक-देशानाम् एक-सहस्राधिकाः प्रकाशकाः सहभागं कुर्वन्ति।
- ईरान◌े प्रवर्तमानानां प्रदर्शन◌ानां मध्ये विश्वनेत◌ृभिः प्रदर्शनकारिषु हिंसक-कार्याचरणस्य निन्दा कृता।
- भारतस्य पी.बी.सिन्धुः मलेशिया ओपन बैडमिण्टन स्पर्धायाम् उपान्त्यचक्रे पराभूय शृङ्खलातो बहिर्भूता ।

----------------------------------------

<u>प्रधानमन्त्री-गुजरातयात्रा</u>

प्रधानमन्त्री नरेन्द्र-मोदी त्रिदिवसीय-यात्रायै अद्य गुजरातं प्राप्नोति। यात्रावधौ प्रधानमन्त्री सोमनाथ-स्वाभिमान-पर्व समेत्य प्रमुखाध्यात्मिक- कार्यक्रमेषु सहभागं करिष्यति। सोमनाथ-मन्दिरस्य शाश्वत-भावनायाः उत्सवम् आमानयितुं चतुर्दिवसीयं सोमनाथ-स्वाभिमान-पर्व गुरुवासरे गिर- सोमनाथ-जनपदस्य तटीय-नगरे वेरावले आरब्धम्। इदं पर्व षड् विंशत्युत्तरैकसहस्रतमे वर्षे महमूद गजनी द्वारा सोमनाथमन्दिरे आक्रमणस्य एकसहस्र-वर्षपूर्तौ स्वतन्त्रतायाः अनन्तरम् एकपञ्चाशदुत्तर-नवदश-शततमे वर्षे मन्दिरस्य पुनरूद्धारस्य पञ्चसप्ततिः वर्षपूर्तौ च आयोज्यते। अस्मै ऐतिहासिकावसरे प्रधानमन्त्रिणः नरेन्द्रमोदिनः स्वागताय पवित्रं नगरं प्रभास- पाटनं पूर्णतया सन्नद्धम् अस्ति।

-----------------------------------------

## विकसितभारत-युव-नेतृ-संवादः

युव-कार्य-क्रीडामन्त्री मनसुख-मांडविया अवोचत् यत् युवानः राष्ट्रनिर्माणे महत्त्वपूर्णां भूमिकां निभालयन्ति। अद्य नवदिल्ल्यां भारत-मण्डपम-प्राङ्गणे ऐषमो विकसितभारत-युव-नेतृ-संवाद-कार्यक्रमं सम्बोधयता तेनोक्तं यत् अयं संवादः युवानः प्रौद्योगिकी, उद्यमिता, शासनम्, सतत-सामाजिक-विकास-प्रभृति क्षेत्रेषु समाधानाय प्रोत्साहयिष्यति। केन्द्रीय मंत्री अवोचत् यत् अयं कार्यक्रमः युवानः राष्ट्रनिर्माणे सम्मेलयितुं प्रशासनस्य प्रतिबद्धतां प्रकटयति।

अत्रावसरे राष्ट्रिय-सुरक्षा-परामर्शदात्रा अजीतडोभालेन भविष्ये विकसित-भारतस्य नेतृत्वं कर्तुं निर्णयस्वीकरणस्य क्षमता विकसितुं च यूनाम् आह्वानम् कृतम्।

चतुर्दिवसीयः अयं कार्यक्रमः गतदिने आरब्धः। अयं कार्यक्रमः सोमवासरे जनवरी द्वादश्यां पूर्णो भविष्यति। अस्मिन् कार्यक्रमे देश-विदेशेभ्यः सार्धद्विसहस्र-युवानः प्रतिभागं कुर्वन्ति ।

-----------------------------------------

## अमितशाहः राजस्थाने

गृहमन्त्री अमितशाहः सबलम् अवोचत् यत् देशस्य वैश्विक-महाशक्तेः रूपेण उदेतुम् आत्मनिर्भरता अत्यन्त-महत्त्वपूर्णा अस्ति। श्रीशाहेन अद्य राजस्थानस्य जोधपुरे मारवाड़ इंटरनेशनल सेन्टर इत्यत्र आयोजिते माहेश्वरी समुदायस्य राष्ट्रिय-सम्मेलनं सम्बोधितम्। तेनोक्तं यत् स्वदेशी उत्पादानाम् उपयोगेण राष्ट्रम् आत्मनिर्भरं स्वावलम्बी च भविष्यति। गृहमन्त्रिणा मातृभाषायाः संवर्धनस्य महत्त्वमपि सबलं प्रतिपादितम्।

-----------------------------------------

## विश्वपुस्तकमेलापकम्

त्रिपञ्चाशत-तमं विश्व-पुस्तक-मेलापकम् अद्य राष्ट्रिय-राजधान्यां नवदिल्ल्याम् आरब्धम्। अस्मिन् नव-दिवसीये आयोजने पञ्चत्रिंशदधिक-देशानाम् एक-सहस्राधिकाः प्रकाशकाः सहभागं कुर्वन्ति। कार्यक्रमस्य उद्घाटनं शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः अकरोत्। अत्रावसरे श्रीप्रधानेन उक्तं यत् पुस्तकानि ज्ञानस्य संवाहकानि वर्तन्ते। इमानि सन्ततयः सभ्यतया स्मृत्या च सह संयोज्य

समाजाय दिशः यच्छन्ति। तेन विश्व-पुस्तक-मेलापकं देशस्य पठन संस्कृतेः बृहत्तमः सार्वजनिकोत्सवःप्रतिपादितः।

भारतीयसैन्येतिहासः वीरता ज्ञानं च @75 इति अस्मिन् वर्षे विश्वपुस्तकमेलापकस्य विषयः अस्ति।

------------------------------------------

## मुख्यन्यायाधीशः

भारतस्य मुख्य-न्यायाधीशः न्यायमूर्तिः सूर्यकान्तः अवोचत् यत् अधिवक्तृभिः आधुनिक-प्रौद्योगिक्याः उपयोगः कर्तव्यः। यतोहि अपराधस्य परिवर्तित-प्रकृतेः कारणेन न्यायपालिकायाम् एतासां प्रौद्योगिकीनाम् उपयोगः तीव्रतया वर्धते। मुख्य- न्यायाधीशः गतदिने हरियाणायाः हांसी इत्यत्र स्थानीय-न्यायिक-परिसरे आयोजिते अभिनन्दन- समारोहे न्यायिकधिकारिणः अधिवक्तृणः च सम्बोधयति स्म।

------------------------------------------

## ऋतु सञ्चेतना

ऋतु विभागेन अद्य राजस्थाने तमिलनाडुराज्ये पुदुचेर्यां कराइकल-क्षेत्रेषु सघन-कुज्झटिकायाः ऑरेंज अलर्ट इति नारङ्गवर्णीया सञ्चेतना प्रसारिता अस्ति। ऋतु विभागेन उक्तं यत् अस्य मासस्य त्रयोदश-दिनाङ्कं यावत् हिमाचलप्रदेशे उत्तराखण्डे हरियाणायां चण्डीगढे दिल्ल्यां मध्यप्रदेशे बिहारे पश्चिमबङ्गाले देशस्य पूर्वोत्तरभागे अपि सघन-कुज्झटिकायाः प्रभावो द्रष्टुं शक्ष्यते।

------------------------------------------

## जमर्न चांसलर

जर्मन-देशस्य फेडरल चांसलर फ्रेडरिक मर्ज़ इत्यसौ अस्य मासस्य द्वादशे दिने सोमवासरे द्विदिवसीय-भारतयात्रायाम् आगमिष्यति। विदेश- मन्त्रालयसस्य अनुसारं निजयात्रावधौ श्रीमर्जः गुजरातस्य साबरमती आश्रमे श्रद्धाञ्जलिं प्रदाय अन्तारास्ट्रिय-पतंग महोत्सवे प्रतिभागं

करिष्यति। अयं महोत्सवः देशद्वयोः मध्ये सांस्कृतिक-सम्बन्धान् प्रकटयति। श्री मर्ज़ः महात्मा मन्दिरे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह प्रतिनिधिमण्डल-स्तरीयं संवादं करिष्यति।

------------------------------------------

## ईरान विश्वनेतारः

ईरान े प्रवर्तमानानां प्रदर्शन ानां मध्ये विश्वनेत ृभिः प्रदर्शनकारिषु हिंसक- कार्याचरणस्य निन्दा कृता। ऑस्ट्रेलिया-कनाडा यूरोपीय-सङ्घाना विदेश- मन्त्रिभिः एकस्मिन् संयुक्त-वक्तव्ये ईरानस्य नागरिक ाणां सहनशक्तिः श्लाघिता। तत्रत्यं प्रशासनं च प्रदर्शनकारिणः विरुध्य घातक ास्त्राणां प्रयोगवारणाय शान्तिपूर्ण-विरोध ाधिकारस्य सम्मान ं कर्तुम् अध्यर्थितम्। अवधेयं यत् ईरान-देशस्य नैकेषु प्रान्तेषु विरोध-प्रदर्शन निध्याय बृहत् सङ्ख्यायां सुरक्षा-बल ानि नियोजितानि। ईरान-प्रशासनेन देशे अन्तर्जालसेवा स्थगिता येन परस्परं जनसम्पर्कः अपि ब ाधितः।

------------------------------------------

## बैडमिण्टन्-क्रीडा

बैडमिण्टन्-क्रीडायां भारतस्य पी.बी.सिन्धुः उपान्त्यचक्रे पराभूय शृङ्खलातो बहिर्भूता।

।। इति वार्ताः ।।